# Natya Shastra Chapter 4

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૪

## Document Information

Text title : naaTyashaastra adhyaaya 4

File name : natya04.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : May 24, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 4

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૪

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ ચતુર્થોઽધ્યાયઃ ।

એવં તુ પૂજનં કૃત્વા મયા પ્રોક્તઃ પિતામહઃ ।
આજ્ઞાપય પ્રભો ક્ષિપ્રં કઃ પ્રયોગઃ પ્રયુજ્યતામ્ ॥ ૧॥

તતોઽસ્મ્યુક્તો ભગવતા યોજયામૃતમન્થનમ્ ।
એતદુત્સાહજનનં સુરપ્રીતિકરં તથા ॥ ૨॥

યોઽયં સમવકારસ્તુ ધર્મકામાર્થસાધકઃ ।
મયા પ્રાગ્ગ્રથિતો વિદ્વન્સ પ્રયોગઃ પ્રયુજ્યતામ્ ॥ ૩॥

તસ્મિન્સમવકારે તુ પ્રયુક્તે દેવદાનવાઃ ।
હૃષ્ટાઃ સમભવન્સર્વે કર્મભાવાનુદર્શનાત્ ॥ ૪॥

કસ્યચિત્વથ કાલસ્ય મામાહામ્બુજસમ્ભવઃ
નાટ્યં સન્દર્શયામોઽદ્ય ત્રિનેત્રાય મહાત્મને ॥ ૫॥

તતઃ સાર્ધં સુરૈર્ગત્વા વૃષભાઙ્કનિવેશનમ્ ।
સમભ્યર્ચ્ય શિવં પશ્ચાદુવાચેદં પિતામહઃ ॥ ૬॥

મયા સમવાકરસ્તુ યોઽયં સૃષ્ટઃ સુરોત્તમ ।
શ્રવણે દર્શને ચાસ્ય પ્રસાદં કર્તુમર્હસિ ॥ ૭॥

પશ્યામ ઇતિ દેવેશો દ્રુહિણં વાક્યમબ્રવીત્ ।
તતો મામાહ ભગવાન્ સજ્જો ભવ મહામતે ॥ ૮॥

તતો હિમવતઃ પૃષ્ઠે નાનાનાગસમાકુલે ।
બહુભૂતગણાકીર્ણે રમ્યકન્દરનિર્જ઼્હરે ॥ ૯॥

પૂર્વરઙ્ગઃ કૃતઃ પૂર્વં તત્રાયં દ્વિજસત્તમાઃ ।
તથા ત્રિપુરદાહશ્ચ ડિમસંજ્ઞઃ પ્રયોજિતઃ ॥ ૧૦॥

તતો ભૂતગણા હૃષ્ટાઃ કર્નભાવાનુકીર્તનાત્ ।
મહાદેવશ્ચ સુપ્રીતઃ પિતામહમથાબ્રવીત્ ॥ ૧૧॥

અહો નાટ્યમિદં સમ્યક્ ત્વયા સૃષ્ટં મહામતે ।
યશસ્યં ચ શુભાર્થં ચ પુણ્યં બુદ્ધિવિવર્ધનમ્ ॥ ૧૨॥

મયાપીદં સ્મૃતં નૃત્યં સન્ધ્યાકાલેષુ નૃત્યતા ।
નાનાકરણસંયુક્તૈરઙ્ગહારૈર્વિભૂષિતમ્ ॥ ૧૩॥

પૂર્વરઙ્ગવિધાવસ્મિંસ્ત્વયા સમ્યક્પ્રયોજ્યતામ્ ।
વર્ધમાનકયોગેષુ ગીતેષ્વાસારિતેષુ ચ ॥ ૧૪॥

મહાગીતેષુ ચૈવાર્થાન્સમ્યગેવાભિનેષ્યસિ ।
યશ્ચાયં પૂર્વરઙ્ગસ્તુ ત્વયા શુદ્ધઃ પ્રયોજિતઃ ॥ ૧૫॥

એભિર્વિમિશ્રિતશ્ચાયં ચિત્રો નામ ભવિષ્યતિ ।
શ્રુત્વા મહેશ્વરવચઃ પ્રત્યુક્તસ્તુ સ્વયંભુવા ॥ ૧૬॥

પ્રયોગમઙ્ગહારાણામાચક્ષ્વ સુરસત્તમ ।
તતસ્તણ્ડું સમાહૂય પ્રોક્તવાન્ ભુવનેશ્વરઃ ॥ ૧૭॥

પ્રયોગમઙ્ગહારાણામાચક્ષ્વ ભરતાય વૈ ।
તતો યે તણ્ડુના પ્રોક્તાસ્ત્વઙ્ગહારા મહાત્મના ॥ ૧૮॥

તાન્વઃ કરણસંયુક્તાન્વ્યાખ્યાસ્યામિ સરેચકાન્ ।
સ્થિરહસ્તોઽઙ્ગહારસ્તુ તથા પર્યસ્તકઃ સ્મૃતઃ ॥ ૧૯॥

સૂચિવિદ્ધસ્તથા ચૈવ હ્યપવિદ્ધસ્તથૈવ ચ ।
આક્ષિપ્તકોઽથ વિજ્ઞેયસ્તથા ચોદ્ઘટ્ટિતઃ સ્મૃતઃ ॥ ૨૦॥

વિષ્કમ્ભશ્ચૈવ સમ્પ્રોક્તસ્તથા ચૈવાપરાજિતઃ ।
વિષ્કમ્ભાપસૃતશ્ચૈઅવ મત્તાક્રીડસ્તથૈવ ચ ॥ ૨૧॥

સ્વસ્તિકો રેચિતશ્ચૈવ પાર્શ્વસ્વસ્તિક એવ ચ ।
વૃશ્ચિકાપસૃતઃ પ્રોક્તો ભ્રમરશ્ચ તથાપરઃ ॥ ૨૨॥

મત્તસ્ખલિતકશ્ચૈવ મદાદ્વિલસિતસ્તથા ।
ગતિમણ્ડલકો જ્ઞેયઃ પરિચ્છિન્નસ્તથૈવ ચ ॥ ૨૩॥

પરિવૃત્તરેચિતોऽથ સ્યાત્તથા વૈશાખરેચિતઃ ।
પરાવૃત્તોऽથ વિજ્ઞેયસ્તથા ચૈવાપ્યલાતકઃ ॥ ૨૪॥

પાર્શ્વચ્છેદોऽથ સમ્પ્રોક્તો વિદ્યુદ્ભ્રાન્તસ્તથૈવ ચ ।
ઊરૂદ્વૃત્તસ્તથા ચૈવ સ્યાદાલીઢસ્તથૈવ ચ ॥ ૨૫॥

રેચિતશ્ચાપિ વિજ્ઞેયસ્તથૈવાચ્છુરિતઃ સ્મૃતઃ ।
આક્ષિપ્તરેચિતશ્ચૈવ સમ્ભ્રાન્તશ્ચ તથાપરઃ ॥ ૨૬॥

અપસર્પસ્તુ વિજ્ઞેયસ્તથા ચાર્ધનિકુટ્ટકઃ ।
દ્વાત્રિંશદેતે સમ્પ્રોક્તા અઙ્ગહારાસ્તુ નામતઃ ॥ ૨૭॥

એતેષાં તુ પ્રવક્ષ્યામિ પ્રયોગં કરણાશ્રયમ્ ।
હસ્તપાદપ્રચારશ્ચ યથા યોજ્યઃ પ્રયોક્તૃભિઃ ॥ ૨૮॥

અઙ્ગહારેષુ વક્ષ્યામિ કરણેષુ ચ વૈ દ્વિજાઃ ।
સર્વેષામઙ્ગહારાણાં નિષ્પત્તિઃ કરણૈર્યતઃ ॥ ૨૯॥

તાન્યતઃ સમ્પ્રવક્ષ્યામિ નામતઃ કર્મતસ્તથા ।
હસ્તપાદસમાયોગો નૃત્યસ્ય કરણં ભવેત્ ॥ ૩૦॥

દ્વે નૃત્તકરણે ચૈવ ભવતો નૃત્તમાતૃકા ।
દ્વાભ્યાં ત્રિભિશ્ચતુર્ભિર્વાપ્યઙ્ગહારસ્તુ માતૃભિઃ ॥ ૩૧॥

ત્રિભિઃ કલાપકં ચૈવ ચતુર્ભિઃ ષણ્ડકં ભવેત્ ।
પઞ્ચૈવ કરણાનિ સ્યુઃ સઙ્ઘાતક ઇતિ સ્મૃતઃ ॥ ૩૨॥

ષડ્ભિર્વા સપ્તભિર્વાપિ અષ્ટભિર્નવભિસ્તથા ।
કરણૈરિહ સંયુક્તા અઙ્ગહારાઃ પ્રકીર્તાઃ ॥ ૩૩॥

એતેષામેવ વક્ષ્યામિ હસ્તપાદવિકલ્પનમ્ ।
તલપુષ્પપુટં પૂર્વં વર્તિતં વલિતોરુ ચ ॥ ૩૪॥

અપવિદ્ધં સમનખં લીનં સ્વસ્તિકરેચિતમ્ ।
મણ્ડલસ્વસ્તિકં ચૈવ નિકુટ્ટકમથાપિ ચ ॥ ૩૫॥

તથૈવાર્ધનિકુટ્ટં ચ કટિચ્છિન્નં તથૈવ ચ ।
અર્ધરેચિતકં ચૈવ વક્ષઃસ્વસ્તિકમેવ ચ ॥ ૩૬॥

ઉન્મત્તં સ્વસ્તિકં ચૈવ પૃષ્ઠસ્વસ્તિકમેવ ચ ।

દિક્સ્વસ્તિકમલાતં ચ તથૈવ ચ કટીસમમ્ ॥ ૩૭॥

આક્ષિપ્તરેચિતં ચૈવ વિક્ષિપ્તાક્ષિપ્તકં તથા ।
અર્ધસ્વસ્તિકમુદ્દિષ્ટમઞ્ચિતં ચ તથાપરમ્ ॥ ૩૮॥

ભુજઙ્ગત્રાસિતં પ્રોક્તમૂર્ધ્વજાનુ તથૈવ ચ ।
નિકુઞ્ચિતં ચ મત્તલ્લિ ત્વર્ધમત્તલ્લિ ચૈવ હિ ॥ ૩૯॥

સ્યાદ્રેચકનિકુટ્ટં ચ તથા પાદાપવિદ્ધકમ્ ।
વલિતં ઘૂર્ણિતં ચૈવ લલિતં ચ તથાપરમ્ ॥ ૪૦॥

દણ્ડપક્ષં તથા ચૈવ ભુજઙ્ગત્રસ્તરેચિતમ્ ।
નૂપુરં ચૈવ સમ્પ્રોક્તં તથા વૈશાખરેચિતમ્ ॥ ૪૧॥

ભ્રમરં ચતુરં ચૈવ ભુજઙ્ગાઞ્ચિતમેવ ચ ।
દણ્ડરેચિતકં ચૈવ તથા વૃશ્ચિકકુટ્ટિતમ્ ॥૪૨॥

કટિભ્રાન્તં તથા ચૈવ લતાવૃશ્ચિકમેવ ચ ।
છિન્નં ચ કરણં પ્રોક્તં તથા વૃશ્ચિકરેચિતમ્ ॥ ૪૩॥

વૃશ્ચિકં વ્યંસિતં ચૈવ તથા પાર્શ્વનિકુટ્ટકમ્ ।
લલાટતિલકં ક્રાન્તં કુઞ્ચિતં ચક્રમણ્ડલમ્ ॥ ૪૪॥

ઉરોમણ્ડલમાક્ષિપ્તં તથા તલવિલાસિતમ્ ।
અર્ગલં ચાથ વિક્ષિપ્તમાવૃત્તં દોલપાદકમ્ ॥ ૪૫॥

વિવૃત્તં વિનિવૃત્તં ચ પાર્શ્વક્રાન્તં નિશુમ્ભિતમ્ ।
વિદ્યુત્ભ્રાન્તમતિક્રાન્તં વિવર્તિતકમેવ ચ ॥ ૪૬॥

ગજક્રીડિતકં ચૈવ તલસંસ્ફોટિતં તથા ।
ગરુડપ્લુતકં ચૈવ ગણ્ડસૂચિ તથાપરમ્ ॥ ૪૭॥

પરિવૃત્તં સમુદ્દિષ્ટં પાર્શ્વજાનુ તથૈવ ચ ।
ગૃધ્રાવલીનકં ચૈવ સન્નતં સૂચ્યથાપિ ચ ॥ ૪૮॥

અર્ધસૂચીતિ કરણં સૂચિવિદ્ધં તથૈવ ચ ।
અપક્રાન્તં ચ સમ્પ્રોક્તં મયૂરલલિતં તથા ॥ ૪૯॥

સર્પિતં દણ્ડપાદં ચ હરિણપ્લુતમેવ ચ ।
પ્રેઙ્ખોલિતં નિતમ્બં ચ સ્ખલિતં કરિહસ્તકમ્ ॥ ૫૦॥

પ્રસર્પિતકમુદ્દિષ્ટં સિંહવિક્રીડતં તથા ।
સિંહાકર્ષિતમુદ્વૃત્તં તથોપસૃતમેવ ચ ॥ ૫૧॥

તલસંઘટ્ટિતં ચૈવ જનિતં ચાવહિત્થકમ્ ।
નિવેશમેલકાક્રીડમૂરૂદ્વૃત્તં તથૈવ ચ ॥ ૫૨॥

મદસ્ખલિતકં ચૈવ વિષ્ણુક્રાન્તમથાપિ ચ ।
સમ્ભ્રાન્તમથ વિષ્કમ્ભમુદ્ઘટ્ટિતમથાપિ ચ ॥ ૫૩॥

વૃષભક્રીડિતં ચૈવ લોલિતં ચ તથાપરમ્ ।
નાગાપસર્પિતં ચૈવ શકટાસ્યં તથૈવ ચ ॥ ૫૪॥

ગઙ્ગાવતરણં ચૈવેત્યુક્તમષ્ટાધિકં શતમ્ ।
અષ્ટોત્તરશતં હ્યેતત્કરણાનાં મયોદિતમ્ ॥ ૫૫॥

નૃત્યે યુદ્ધે નિયુદ્ધે ચ તથ ગતિપરિક્રમે ।
ગતિપ્રચારે વક્ષ્યામિ યુદ્ધચારીવિકલ્પનમ્ ॥ ૫૬॥

યત્ર તત્રાપિ સંયોજ્યમાચાર્યૈર્નાટ્યશક્તિનઃ ।
પ્રાયેણ કરણે કાર્યો વામો વક્ષઃસ્થિતઃ કરઃ ॥ ૫૭॥

ચરણસ્યાનુગશ્ચાપિ દક્ષિણસ્તુ ભવેત્કરઃ ।
હસ્તપાદપ્રચારન્તુ કટિપાર્શ્વોરુસંયુતમ્ ॥ ૫૮॥

ઉરઃપૃષ્ઠોદરોપેતં વક્ષ્યમાણં નિબોધત ।
યાનિ સ્થાનાનિ યાશ્ચાર્યો નૃત્યહસ્તાસ્તથૈવ ચ ॥ ૫૯॥

સા માતૃકેતિ વિજ્ઞેયા તદ્યોગાત્કરણં ભવેત્ ।
કટી કર્ણસમા યત્ર કોર્પરાંસશિરસ્તથા ॥ ૬૦॥

સમુન્નતમુરશ્ચૈવ સૌષ્ઠવં નામ તદ્ભવેત્ ।
વામે પુષ્પપુટઃ પાર્શ્વે પાદોઽગ્રતલસઞ્ચરઃ ॥ ૬૧॥

તથા ચ સન્નતં પાર્શ્વં તલપુષ્પપુટં ભવેત્ ।
કુઞ્ચિતૌ મણિબન્ધે તુ વ્યાવૃત્તપરિવર્તિતૌ ॥ ૬૨॥

હસ્તૌ નિપતિતૌ ચોર્વોર્વર્તિતં કરણં તુ તત્ ।
શુકતુણ્ડૌ યદા હસ્તૌ વ્યાવૃત્તપરિવર્તિતૌ ॥ ૬૩॥

ઉરૂ ચ વલિતૌ યસ્મિન્વલિતોરુકમુચ્યતે ।
આવર્ત્ય શુકતુણ્ડાખ્યમૂરુપૃષ્ઠે નિપાતયેત્ ॥ ૬૪॥

વામહતશ્ચ વક્ષઃસ્થોઽપ્યપવિદ્ધં તુ તદ્ભવેત્ ।
શ્લિષ્ટૌ સમનખૌ પદૌ કરૌ ચાપિ પ્રલિમ્બિતૌ ॥ ૬૫॥

દેહઃ સ્વાભાવિકો યત્ર ભવેત્સમનખં તુ તત્ ।
પતાકાઞ્જલિ વક્ષઃસ્થં પ્રસારિતશિરોધરમ્ ॥ ૬૬॥

નિહઞ્ચિતાંસકૂટં ચ તલ્લિનં કરણં સ્મૃતમ્ ।
સ્વસ્તિકૌ રેચિતાવિદ્ધૌ વિશ્લિષ્ટૌ કટિસંશ્રિતૌ ॥ ૬૭॥

યત્ર તત્કરણં જ્ઞેયં બુધૈઃ સ્વસ્તિકરેચિતમ્ ।
સ્વસ્તિકૌ તુ કરૌ કૃત્વા પ્રાઙ્ગમુખોર્ધ્વતલૌ સમૌ ॥ ૬૮॥

તથા ચ મણ્ડલં સ્થાનં મણ્ડલસ્વસ્તિકં તુ તત્ ।
નિકુટ્ટિતૌ યદા હસ્તૌ સ્વબાહુશિરસોઽન્તરે ॥ ૬૯॥

પાદૌ નિકુટ્ટિતૌ ચૈવ જ્ઞેયં તત્તુ નિકુટ્ટકમ્ ।
અઞ્ચિતૌ બાહુશિરસિ હસ્તસ્ત્વભિમુખાઙ્ગુલિઃ ॥ ૭૦॥

નિકુઞ્ચિતાર્ધયોગેન ભવેદર્થનિકુટ્ટકમ્ ।
પર્યાયશઃ કટિશ્છિન્ના બાહ્વોઃ શિરસિ પલ્લવૌ ॥ ૭૧॥

પુનઃપુનશ્ચ કરણં કટિચ્છિનં તુ તદ્ભવેત્ ।
અપવિદ્ધકરઃ સૂચ્યા પાદશ્ચૈવ નિકુટ્ટિતઃ ॥ ૭૨॥

સંન્નતં યત્ર પાર્શ્વં ચ તદ્ભવેઅર્ધરેચિતમ્ ।
સ્વસ્તિકૌ ચરણૌ યત્ર કરૌ વક્ષસિ રેચિતૌ ॥ ૭૩॥

નિકુઞ્ચિતં તથા વક્ષો વક્ષસ્સ્વસ્તિકમેવ તત્ ।
આઞ્ચિતેન તુ પાદેન રેચિતૌ તુ કરૌ યદા ॥ ૭૪॥

ઉન્મતં કરણં તત્તુ વિજ્ઞેયં નૃત્યકોવિદૈઃ ।
હસ્તાભ્યામથ પાદાભ્યાં ભવતઃ સ્વસ્તિકૌ યદા ॥ ૭૫॥

તત્સ્વસ્તિકમિતિ પ્રોક્તં કરણં કરણાર્થિભિઃ ।
વિક્ષિપ્તાક્ષિપ્તબાહુભ્યાં સ્વસ્તિકૌ ચરણૌ યદા ॥ ૭૬॥

અપક્રાન્તાર્ધસૂચિભ્યાં તત્પૃષ્ઠસ્વસ્તિકં ભવેત્ ।
પાર્શ્વયોરગ્રતશ્ચૈવ યત્ર શ્લિષ્ટઃ કરો ભવેત્ ॥ ૭૭॥

સ્વસ્તિકૌ હસ્તપાદાભ્યાં તદ્દિક્સ્વસ્તિકમુચ્યતે ।

અલાતં ચરણં કૃત્વા વ્યંસયેદ્દક્ષિણં કરમ્ ॥ ૭૮॥

ઊર્ધ્વજાનુક્રમં કુર્યાદલાતકમિતિ સ્મૃતમ્ ।
સ્વસ્તિકાપસૃતઃ પાદઃ કરૌ નાભિકટિસ્થિતૌ ॥ ૭૯॥

પાર્શ્વમુદ્વાહિતં ચૈવ કરણં તત્કટીસમમ્ ।
હસ્તૌ હૃદિ ભવેદ્વામઃ સવ્યશ્ચાક્ષિપ્તરેચિતઃ ॥૮૦॥

રેચિતશ્ચાપવિદ્ધશ્ચ તત્સ્યાદાક્ષિપ્તરેચિતમ્ ।
વિક્ષિપ્તં હસ્તપાદં ચ તસ્યૈવાક્ષેપણં પુનઃ ॥ ૮૧॥

યત્ર તત્કરણં જ્ઞેયં વિક્ષિપ્તાક્ષિપ્તકં દ્વિજાઃ ।
સ્વસ્તિકૌ ચરણૌ કૃત્વા કરિહસ્તં ચ દક્ષિણમ્ ॥ ૮૨॥

વક્ષસ્થાને તથા વામમર્ધસ્વસ્તિકમાદિશેત્ ।
વ્યાવૃત્તપરિવૃત્તસ્તુ સ એવ તુ કરો યદા ॥ ૮૩॥

અઞ્ચિતો નાસિકાગ્રે તુ તદઞ્ચિતમુદાહૃતમ્ ।
કુઞ્ચિતં પાદમુત્ક્ષિપ્ય ત્ર્યશ્રમૂરું વિવર્તયેત્ ॥ ૮૪॥

કટિજાનુવિવર્તાચ્ચ ભુજઙ્ગત્રાસિતં ભવેત્ ।
કુઞ્ચિતં પાદમુત્ક્ષિપ્ય જનુસ્તનસમં ન્યસેત્ ॥ ૮૫॥

પ્રયોગવશગૌ હસ્તાવૂર્ધ્વજાનુ પ્રકીર્તિતમ્ ।
વૃશ્ચિકં ચરણં કૃત્વા કરં પાર્શ્વે નિકુઞ્ચયેત્ ॥ ૮૬॥

નાસાગ્રે દક્ષિણં ચૈવ જ્ઞેયં તત્તુ નિકુઞ્ચિતમ્ ।
વામદક્ષિણપાદાભ્યાં ઘૂર્ણમાનોપસર્પણૈઃ ॥૮૭॥

ઉદ્વેષ્ટિતાપવિદ્ધૈશ્ચ હસ્તૈર્મત્તલ્લ્યુદાહૃતમ્ ।
સ્ખલિતાપસૃતૌ પાદૌ વામહસ્તશ્ચ રેચિતઃ ॥ ૮૮॥

સવ્યહસ્તઃ કટિસ્થઃ સ્યાદર્ધમત્તલ્લિ તત્સ્મૃતમ્ ।
રેચિતો દક્ષિણો હસ્તઃ પાદઃ સવ્યો નિકુટ્ટિતઃ ॥ ૮૯॥

દોલા ચૈવ ભવેદ્વામસ્તદ્રેચિતનિકુટ્ટિતમ્ ।
કાર્યૌ નાભિતટે હસ્તૌ પ્રાઙ્મુખૌ ખટકામુખૌ ॥ ૯૦॥

સૂચીવિદ્ધાવપક્રાન્તૌ પાદૌ પાદાપવિદ્ધકે ।
અપવિદ્ધો ભવેદ્ધસ્તઃ સૂચીપાદસ્તથૈઅવ ચ ॥ ૯૧॥

તથા ત્રિકં વિવૃત્તં ચ વલિતં નામ તદ્ભવેત્ ।
વર્તિતાઘૂર્ણિતઃ સવ્યો હસ્તો વામશ્ચ દોલિતઃ ॥ ૯૨॥

સ્વસ્તિકાપસૃતઃ પાદઃ કરણં ઘૂર્ણિતં તુ તત્ ।
કરિહસ્તો ભવેદ્વામો દક્ષિણશ્ચ વિવર્તિતઃ ॥ ૯૩॥

બહુશઃ કુટ્ટિતઃ પદો જ્ઞેયં તલ્લલિતં બુધૈઃ ।
ઊર્ધ્વજાનું વિધાયાથ તસ્યોપરિ લતાં ન્યસેત્ ॥ ૯૪॥

દણ્ડપક્ષં તત્પ્રોક્તં કર્ણં નૃત્યવેદિભિઃ ।
ભુજઙ્ગત્રાસિતં કૃત્વા યત્રોભાવપિ રેચિતૌ ॥ ૯૫॥

વામપાર્શ્વસ્થૌ હસ્તૌ ભુજઙ્ગત્રસ્તરેચિતમ્ ।
ત્રિકં સુવલિતં કૃત્વા લતારેચિતકૌ કરૌ ॥ ૯૬॥

નૂપુર્શ્ચ તથા પાદઃ કરણ્E નૂપુરે ન્યસેત્ ।
રેચિતૌ હસ્તપાદૌ ચ કટી ગ્રીવા ચ રેચિતા ॥ ૯૭॥

વૈશાખસ્થાનકેનૈતદ્ભવેવૈશાખરેચિતમ્ ।
આક્ષિપ્તઃ સ્વસ્તિકઃ પાદઃ કરૌ ચોદ્વેષ્ટિતૌ તથા ॥ ૯૮॥

ત્રિકસ્ય વલનાચ્ચૈવ  જ્ઞેયં ભ્રમરકં તુ તત્ ।
અઞ્ચિતઃ સ્યાત્કરો વામઃ સવ્યશ્ચતુર એવ તુ ॥ ૯૯॥

દક્ષિણઃ કુટ્ટિતઃ પાદશ્ચતુરં તત્પ્રકીર્તિતમ્ ।
ભુજઙ્ગત્રાસિતઃ  પાદો દક્ષિણો રેચિતઃ કરઃ ॥ ૧૦૦॥

લતાખ્યશ્ચ કરો વામો ભુજઙ્ગાઞ્ચિતકં ભવેત્ ।
વિક્ષિપ્તં હસ્તપાદં તુ સમન્તાદ્યત્ર દણ્ડવત્ ॥ ૧૦૧॥

રેચ્યતે તદ્ધિ કરણં જ્ઞેયં દણ્ડકરેચિતમ્ ।
વૃશ્ચિકં ચરણં કૃત્વા દ્વાવપ્યથ નિકુટ્ટિતૌ ॥ ૧૦૨॥

વિધાતવ્યૌ કરૌ તત્તુ જ્ઞેયં વૃશ્ચિકકુટ્ટિતમ્ ।
સૂચિં કૃત્વાપવિદ્ધં ચ દક્ષિણં ચરણં ન્યસેત્ ॥ ૧૦૩॥

રેચિતા ચ કટિર્યત્ર કટિભ્રાન્તં તદુચ્યતે ।
અઞ્ચિતઃ પૃષ્ઠતઃ પાદઃ કુઞ્ચિતોર્ધ્વતલાઙ્ગુલિઃ ॥ ૧૦૪॥

લતાખ્યશ્ચ કરો વામસ્તલ્લતાવૃશ્ચિકં ભવેત્ ।
અલપદ્મઃ કટીદેશે છિન્ના પર્યાયશઃ કટી ॥ ૧૦૫॥

વૈશાખસ્થાનકેનેહ તચ્છિન્નં કરણં ભવેત્ ।
વૃશ્ચિકં ચરણં કૃત્વા સ્વસ્તિકૌ ચ કરવુભૌ ॥ ૧૦૬॥

રેચિતૌ વિપ્રકીર્ણૌ ચ કરૌ વૃશ્ચિકરેચિતમ્ ।
બાહુશીર્ષાઞ્ચિતૌ હસ્તૌ પાદઃ પૃષ્ઠાઞ્ચિતસ્તથા ॥ ૧૦૭॥

દૂરસન્નતપૃષ્ઠં ચ વૃશ્ચિકં તત્પ્રકીર્તિતમ્ ।
આલીઢં સ્થાનકં યત્ર કરૌ વક્ષસિ રેચિતૌ ॥ ૧૦૮॥

ઊર્ધ્વાધો વિપ્રકીર્ણૌ ચ વ્યંસિતં કરણં તુ તત્ ।
હસ્તૌ તુ સ્વસ્તિકૌ પાર્શ્વે તથા પાદો નિકુટ્ટિતઃ ॥ ૧૦૯॥

યત્ર તત્કરણં જ્ઞેયં બુધૈઃ પાર્શ્વનિકુટ્ટિતમ્ ।
વૃશ્ચિકં ચરણં કૃત્વા પાદસ્યાઙ્ગુષ્ઠકેન તુ ॥ ૧૧૦॥

લલાટે તિલકં કુર્યાલ્લલાટતિલકં તુ તત્ ।
પૃષ્ઠતઃ કુઞ્ચિતં કૃત્વા વ્યતિક્રાન્તક્રમં તતઃ ॥ ૧૧૧॥

આક્ષિપ્તૌ ચ કરૌ કાર્યૌ ક્રાન્તકે કરણે દ્વિજાઃ ।
આદ્યઃ પાદો નતઃ કાર્યઃ સવ્યહસ્તશ્ચ કુઞ્ચિતઃ ॥ ૧૧૨॥

ઉત્તાનો વામપાર્શ્વસ્થસ્તત્કુઞ્ચિતમુદાહૃતમ્ ।
પ્રલમ્બિતાભ્યાં બાહુભ્યાં યદ્ગાત્રેણાનતેન ચ ॥ ૧૧૩॥

અભ્યન્તરાપવિદ્ધઃ સ્યાત્તજ્જ્ઞેયં ચક્રમણ્ડલમ્ ।
સ્વસ્તિકાપસૃતૌ પાદાવપવિદ્ધક્રમૌ યદા ॥ ૧૧૪॥

ઉરોમણ્ડલકૌ હસ્તાવુરોમણ્ડલિકસ્તુ   તત્ ।
આક્ષિપ્તં હસ્તપાદં ચ ક્રિયતે  યત્ર વેગતઃ ॥ ૧૧૫॥

આક્ષિઓતં નામ કરણં વિજ્ઞેયં તદ્દ્વિજોત્તમાઃ ।
ઊર્ધ્વાઙ્ગુલિતલઃ પાદઃ પાર્શ્વેનોર્ધ્વં પ્રસારિતઃ ॥ ૧૧૬॥

પ્રકુર્યાદઞ્ચિતતલૌ હસ્તૌ તલવિલાસિતે ।
પૃષ્ઠતઃ પ્રસૃતઃ પાદૌ દ્વૌ તાલાવર્ધમેવ ચ ॥ ૧૧૭॥

તસ્યેવ ચાનુગો હસ્તઃ પુરતસ્ત્વર્ગલં તુ તત્ ।
વિક્ષિપ્તં હસ્તપાદં ચ પૃષ્ઠતઃ પાર્શ્વતોઽપિ વા ॥ ૧૧૮॥

એકમાર્ગગતં યત્ર તદ્વિક્ષિપ્તમુદાહૃતમ્ ।

પ્રસાર્ય કુઞ્ચિતં પાદં પુનરાવર્તયેત્ દ્રુતમ્ ॥ ૧૧૯॥

પ્રયોગવશગૌ હસ્તૌ તદાવર્તમુદાહૃતમ્ ।
કુઞ્ચિતં પાદમુત્ક્ષિપ્ય પાર્શ્વાત્પાર્શ્વં તુ ડોલયેત્ ॥ ૧૨૦॥

પ્રયોગવશગૌ હસ્તૌ ડોલાપાદં તદુચ્યતે ।
આક્ષિપ્તં હસ્તપાદં ચ ત્રિકં ચૈવ વિવર્તયેત્ ॥ ૧૨૧॥

રેચિતૌ ચ તથા હસ્તૌ વિવૃત્તે કરણે દ્વિજાઃ ।
સૂચીવિદ્ધં વિધાયાથ ત્રિકં તુ વિનિવર્તયેત્ ॥ ૧૨૨॥

કરૌ ચ રેચિતૌ કાર્યૌ વિનિવૃત્તે દ્વિજોત્તમઃ ।
પાર્શ્વક્રાન્તક્રમં કૃત્વા પુરસ્તાદથ પાતયેત્ ॥ ૧૨૩॥

પ્રયોગવશગૌ હસ્તૌ પાર્શ્વક્રાન્તં તદુચ્યતે ।
પૃષ્ઠતઃ કુઞ્ચિતઃ પાદૌ વક્ષશ્ચૈવ સમુન્નતમ્ ॥ ૧૨૪॥

તિલકે ચ કરઃ સ્થાપ્યસ્તન્નિસ્તમ્ભિતમુચ્યતે ।
પૃષ્ઠતો વલિતં પાદં શિરોઘૃષ્ટં પ્રસારયેત્ ॥ ૧૨૫॥

સર્વતો મણ્ડલાવિદ્ધં વિદ્યુદ્ભ્રાન્તં તદુચ્યતે ।
અતિક્રાન્તક્રમં કૃત્વા પુરસ્તાત્સમ્પ્રસારયેત્ ॥ ૧૨૬॥

પ્રયોગવશગૌ હસ્તાવતિક્રાન્તે પ્રકીર્તિતૌ ।
આક્ષિપ્તં હસ્તપાદં ચ ત્રિકં ચૈવ વિવર્તિતમ્ ॥ ૧૨૭॥

દ્વિતીયો રેચિતો હસ્તો વિવર્તિતકમેવ તત્ ।
કર્ણેઽઞ્ચિતઃ કરો વામો લતાહસ્તશ્ચ દક્ષિણઃ ॥ ૧૨૮॥

દોલાપાદસ્તથા ચૈવ ગજક્રીડિતકં ભવેત્ ।
દ્રુતમુત્ક્ષિપ્ય ચરણં પુરસ્તાદથ પાતયેત્ ॥ ૧૨૯॥

તલસંસ્ફોટિતૌ હસ્તૌ તલસંસ્ફોટિતે મતૌ ।
પૃષ્ઠપ્રસારિતઃ પાદઃ લતારેચિતકૌ કરૌ ॥ ૧૩૦॥

સમુન્નતં શિરશ્ચૈવ ગરુડપ્લુતકં ભવેત્ ।
સૂચિપાદો નતં પાર્શ્વમેકો વક્ષઃસ્થિતઃ કરઃ ॥ ૧૩૧॥

દ્વિતીયશ્ચાઞ્ચિતો ગણ્ડે ગણ્ડસૂચી તદુચ્યતે ,
ઊર્ધ્વાપવેષ્ટિતૌ હસ્તૌ સૂચીપાદો વિવર્તિતઃ ॥ ૧૩૨॥

પરિવૃત્તત્રિકં ચૈવ પરિવૃત્તં તદુચ્યતે ।
એકઃ સમસ્થિતઃ પાદ ઊરુપૃષ્ઠે સ્થિતોઽપરઃ ॥ ૧૩૩ ॥

મુષ્ટિહસ્તશ્ચ વક્ષઃસ્થઃ પાર્શ્વજાનુ તદુચ્યતે ।
પૃષ્ઠપ્રસારિતઃ પાદઃ કિઞ્ચિતઞ્ચિત જાનુકઃ ॥ ૧૩૪ ॥

યત્ર પ્રસારિતો બાહૂ તત્સ્યાત્ ગૃધ્રાવલીનકમ્ ।
ઉત્પ્લુત્ય ચરણૌ કાર્યાવગ્રતઃ સ્વસ્તિકસ્થિતૌ ॥ ૧૩૫ ॥

સન્નતૌ ચ તથા હસ્તૌ સન્નતં તદુદાહૃતમ્ ।
કુઞ્ચિતં પાદમુત્ક્ષિપ્ય કુર્યાદગ્રસ્થિતં ભુવિ ॥ ૧૩૬ ॥

પ્રયોગવશગૌ હસ્તૌ સા સૂચી પરિકીર્તિતા ।
અલપદ્મઃ શિરોહસ્તઃ સૂચીપાદશ્ચ દક્ષિણઃ ॥ ૧૩૭ ॥

યત્ર તત્કરણં જ્ઞેઅયમર્ધસૂચીતિ નામતઃ ।
પાદસૂચ્યા યદા પાદો દ્વિતીયસ્તુ પ્રવિધ્યતે ॥ ૧૩૮ ॥

કટિવક્ષઃસ્થિતૌ હસ્તૌ સૂચીવિધં તદુચ્યતે ।
કૃત્વોરુવલિતં પાદમપક્રાન્તક્રમં ન્યસેત્ ॥ ૧૩૯ ॥

પ્રયોગવશગૌ હસ્તવપક્રાન્તં તદુચ્યતે ।
વૃશ્ચિકં ચરણં કૃત્વા રેચિતૌ ચ તથા કરૌ ॥ ૧૪૦ ॥

તથા ત્રિકં વિવૃત્તં ચ મયૂરલલિતં ભવેત્ ।
અઞ્ચિતાપસૃતૌ પાદૌ શિરશ્ચ પરિવાહિતમ્ ॥ ૧૪૧ ॥

રેચિતૌ ચ તથા હસ્તૌ તત્સર્પિતમુદાહૃતમ્ ।
નૂપુરં ચરણં કૃત્વા દણ્ડપાદં પ્રસારયેત્ ॥ ૧૪૨ ॥

ક્ષિપ્રાવિદ્ધકરં ચૈવ દણ્ડપાદં તદુચ્યતે ।
અતિક્રાન્તક્રમં કૃત્વા સમુત્પ્લુત્ય નિપાતયેત્ ॥ ૧૪૩ ॥

જઙ્ઘાઞ્ચિતોપરિ ક્ષિપ્તા તદ્વિદ્યાદ્ધરિણપ્લુતમ્ । (see the cluster NghA. A new ligature may be added to represent this cluster)
ડોલાપાદક્રમં કૃત્વા સમુત્પ્લુત્ય નિપાતયેત્ ॥૧૪૪॥

પરિવૃત્તત્રિકં ચૈવ તત્પ્રેઙ્ખોલિતમુચ્યતે ।
ભુજાવૂર્ધ્વવિનિષ્ક્રાન્તૌ હસ્તૌ ચાભિ ( ધો ) મુખાઙ્ગુલી ॥ ૧૪૫ ॥

બદ્ધા ચારી તથ ચૈવ નિતમ્બે કરણે ભવેત્ ।

દોલાપાદક્રમં કૃત્વા હસ્તૌ તદનુગાવુભૌઅ ॥ ૧૪૬॥

રેચિતૌ ઘૂર્ણિતૌ વાપિ સ્ખલિતં કરણં ભવેત્ ।
એકો વક્ષઃસ્થિતો હસ્તઃ પ્રોદ્વેષ્ટિતતલોઽપરઃ ॥ ૧૪૭॥

અઞ્ચિતશ્ચરણશ્ચૈવ પ્રયોજ્યઃ કરિહસ્તકે ।
એકસ્તુ રેચિતો હસ્તો લતાખ્યસ્તુ તથા પરઃ ॥ ૧૪૮॥

પ્રસર્પિતતલૌ પાદૌ પ્રસર્પિતકમેવ તત્ ।
અલાતં ચ પુરઃકૃત્વા દ્વિતીયં ચ દ્રુતક્રમમ્ ॥ ૧૪૯॥

હસ્તૌ પાદાનુગૌ ચાપિ સિંહવિક્રીડિતે સ્મૃતૌ ।
પૃષ્ઠપ્રસર્પિતઃ પાદસ્તથા હસ્તૌ નિકુઞ્ચિતૌ ॥ ૧૫૦॥

પુનસ્તથૈવ કર્તવ્યૌ સિંહાકર્ષકે દ્વિજાઃ ।
આક્ષિપ્તહસ્તમાક્ષિપ્તદેહમાક્ષિપ્તપાદકમ્ ॥ ૧૫૧॥

અદ્વૃત્તગાત્રમિત્યેતદુદ્વૃતાં કરણં સ્મૃતમ્ ।
આક્ષિપ્તચરણશ્ચૈકો હસ્તૌ તસ્યૈવ ચાનુગૌ ॥ ૧૫૨॥

આનતં ચ તથ ગાત્રં તયોપસૃતકં ભવેત્
દોલાપાદક્રમં કૃત્વા તલસઙ્ઘટ્ટિતૌ કરૌ ॥ ૧૫૩॥

રેચયેચ્ચ કરં વામં તલસઙ્ઘટ્ટિતે સદા ।
એકો વક્ષઃસ્થિતો હસ્તો દ્વ્તીયશ્ચ પ્રલમ્બિતઃ ॥ ૧૫૪॥

તલાગ્રસંસ્થિતઃ પાદો જનિતે કરણે ભવેત્ ।
જનિતં કરણં કૃત્વા હસ્તૌ ચાભિમુખાઙ્ગુલી ॥ ૧૫૫॥

શનૈર્નિપતિતો ચૈવ જ્ઞેયં તદવહિત્થકમ્ ।
કરૌ વક્ષઃસ્થિતૌ કાર્યાવુરૌ નિર્ભુગ્નમેવ ચ ॥ ૧૫૬॥

મણ્ડલસ્થાનકં ચૈવ નિવેશં કરણં તુ તત્ ।
તલસઞ્ચરપાદાભ્યામુત્પ્લુત્ય પતનં ભવેત્ ॥૧૫૭॥

સંનતં વલિતં ગાત્રમેલકાક્રીડિતં તુ તત્ ।
કરમાવૃત્તકરણમૂરુપૃષ્ઠેઽઞ્ચિતં ન્યસેત્ ॥ ૧૫૮॥

જઙ્ઘાઞ્ચિતા તથોદ્વૃત્તા હ્યૂરૂદ્વૃત્તં તુ તદ્ભવેત્ ।
કરૌ પ્રલમ્બિતૌ કાર્યૌ શિરશ્ચ પરિવાહિતમ્ ॥ ૧૫૯॥

પાદૌ ચ વલિતાવિધ્દૌઅ મદસ્ખલિતકે દ્વિજાઃ ।
પુરઃ પ્રસારિતઃ પાદઃ કુઞ્ચિતો ગગનોન્મુખઃ ॥ ૧૬૦॥

કરૌ ચ રેચિતૌ યત્ર વિષ્ણુક્રાન્તં તદુચ્યતે ।
કરમાવર્તિતં કૃત્વા હ્યૂરુપૃષ્ઠે નિકુઞ્ચયેત્ ॥૧૬૧॥

ઊરુશ્ચૈવ તથાવિદ્ધઃ સમ્ભ્રાન્તં કરણં તુ તત્ ।
અપવિદ્ધઃ કરઃ સૂચ્યા પાદશ્ચૈવ નિકુટ્ટિતઃ ॥ ૧૬૨॥

વક્ષઃસ્થશ્ચ કરો વામો વિષ્કમ્ભે કરણે ભવેત્ ।
પાદાવુદ્ઘટ્ટિતૌ કાર્યૌ તલસઙ્ઘટ્ટિતૌ કરૌ ॥ ૧૬૩॥

નતશ્ચ પાર્શ્વ કર્તવ્યં બુધૈરુદ્ઘટ્ટિતે સદા ।
પ્રયુજ્યાલાતકં પૂર્વં હસ્તૌ ચાપિ હિ રેચયેત્ ॥ ૧૬૪॥

કુઞ્ચિતાવઞ્ચિતૌ ચૈવ વૃષભક્રીડિતે સદા ।
રેચિતાવઞ્ચિતૌ હસ્તૌ લોલિતં વર્તિતં શિરઃ ॥ ૧૬૫॥

ઉભયોઃપાર્શ્વયોર્યત્ર તલ્લોલિતમુદાહૃતમ્ ।
સ્વસ્તિકાપસૃતૌ પાદૌ શિરશ્ચ પરિવાહિતમ્॥ ૧૬૬॥

રેચિતૌ ચ તથા હસ્તૌ સ્યાતાં નાગાપસર્પિતે ।
નિષણ્ણાઙ્ગસ્તુ ચરણં પ્રસાર્ય તલસઞ્ચરમ્ ॥ ૧૬૭॥

ઉદ્વાહિતમુરઃ કૃત્વા શકટાસ્યં પ્રયોજયેત્ ।
ઊર્ધ્વાઙ્ગુલિતલૌ પાદૌ ત્રિપતાકાવધોમુખૌ ॥ ૧૬૮॥

હસ્તૌ શિરસ્સન્નતં ચ ગઙ્ગાવતરણં ત્વિતિ ।
યાનિ સ્થાનાનિ યાશ્ચાર્યો વ્યાયામે કથિતાનિ તુ ॥ ૧૬૯॥

પાદપ્રચારસ્ત્વેષાં તુ કરણાનામયં ભવેત્ ।
યે ચાપિ નૃત્તહસ્તાસ્તુ ગદિતા નૃત્તકર્મણિ ॥ ૧૭૦॥

તેષાં સમાસતો યોગઃ કરણેષુ વિભાવ્યતે ।
પ્રાયેણ કરણે કાર્યો વામો વક્ષઃસ્થિતઃ કરઃ ॥ ૧૭૧॥

ચરણશ્ચાનુગશ્ચાપિ દક્ષિણસ્તુ ભવેત્કરઃ ।
ચાર્યશ્ચૈવ તુ યાઃ પ્રોક્તા નૃત્તહસ્તાસ્તથૈવ ચ ॥ ૧૭૨॥

સા માતૃકેતિ વિજ્ઞેયા તદ્ભેદાત્કરણાનિ તુ ।
અષ્ટોત્તરશતં હ્યેતત્કરણાનાં મયોદિતમ્ ॥ ૧૭૩॥

અતઃ પરં પ્રવક્ષ્યામિ હ્યઙ્ગહારવિકલ્પનમ્ ।
પ્રસાર્યોત્ક્ષિપ્ય ચ કરૌ સમપાદં પ્રયોજયેત્ ॥ ૧૭૪॥

વ્યંસિતાપસૃતં સવ્યં હસ્તમૂર્ધ્વં પ્રસારયેત્ ।
પ્રત્યાલીઢં તતઃ કુર્યાત્ તથૈવ ચ નિકુટ્ટકમ્ ॥ ૧૭૫॥

ઊરૂદ્વૃત્તં તતઃ કુર્યાદક્ષિપ્તં સ્વસ્તિકં તતઃ ।
નિતમ્બં કરિ હસ્તં ચ કટિચ્છિન્નં ચ યોગતઃ ॥ ૧૭૬॥

સ્થિરહસ્તો ભવેદેષ ત્વઙ્ગહારો હરપ્રિયઃ ।
તલપુષ્પાપવિદ્ધે દ્વે વર્તિતં સંનિકુટ્ટિકમ્ ॥ ૧૭૭॥

ઊરૂદ્વૃત્તં તથાક્ષિપ્તમુરોમણ્ડલમેવ ચ ।
નિતમ્બં કરિહસ્તં ચ કટિચ્છિન્નં તથૈવ ચ ॥ ૧૭૮॥

એષ પર્યસ્તકો નામ હ્યઙ્ગહારો હરોદ્ભવઃ ।
અલપલ્લવસૂચીં ચ કૃત્વા વિક્ષિપ્તમેવ ચ ॥૧૭૯॥

આવર્તિતં તતઃ કુર્યાત્તથૈઅવ ચ નિકુટ્ટકમ્ ।
ઊરૂદ્વૃત્તં તથાક્ષિપ્તમુરોમણ્ડલમેવ ચ ॥ ૧૮૯॥

કરિહસ્તં કટિચ્છિન્નં સૂચીવિદ્ધો ભવેદયમ્ ।
અપવિદ્ધં તુ કરણં સૂચીવિદ્ધં તથૈવ ચ ॥ ૧૮૧॥

ઉદ્વેષ્ટિતેન હસ્તેન ત્રિકં તુ પરિવર્તયેત્ ।
ઉરોમણ્ડલકૌ હસ્તૌ કટિચ્છિન્નં તથૈવ ચ ॥ ૧૮૨॥

અપવિદ્ધોઽઙ્ગહારાશ્ચ વિજ્ઞેયોઽયં પ્રયોક્તૃભિઃ ।
કરણં નૂપુરં કૃત્વા વિક્ષિપ્તાલાતકે પુનઃ ॥ ૧૮૩॥

પુનરાક્ષિપ્તકં કુર્યાદુરોમણ્ડલકં તથા ।
નિતમ્બં કરિહસ્તં ચ કટિચ્છિન્નં તથૈવ ચ ॥ ૧૮૪॥

આક્ષિપ્તકઃ સ વિજ્ઞેયો હ્યઙ્ગહારઃ પ્રયોક્તૃભિઃ ।
ઉદ્વેષ્ટિતાપવિદ્ધસ્તુ કરઃ પાદો નિકુટ્ટિતઃ ॥ ૧૮૫॥

પુનસ્તેનૈવ યોગેન વામપાર્શ્વે ભવેદથ ।
ઉરોમણ્ડલકૌ હસ્તૌ નિતમ્બં કરિહસ્તકમ્ ॥ ૧૮૬
કર્તવ્યં સકટિચ્છિન્નં નૃત્યે તૂદ્ઘટ્ટિતે સદા ।

પર્યાયોદ્વેષ્ટિતૌ હસ્તૌ પાદૌ ચૈવ નિકુટ્ટિતૌ ॥ ૧૮૭॥

કુઞ્ચિતાવઞ્ચિતૌઅ ચૈવ હ્યૂરૂદ્વૃત્તં તથૈવ ચ ।
ચતુરશ્રં કરં કૃત્વા પાદેન ચ નિકુટ્ટકમ્ ॥ ૧૮૮॥

ભુજઙ્ગત્રાસિતં ચૈવ કરં ચોદ્વિષ્ટિતં પુનઃ ।
પરિચ્છિન્નં ચ કર્તવ્યં ત્રિકં ભ્રમરકેણ તુ ॥ ૧૮૯॥

કરિહસ્તં કટિચ્છિન્નં વિષ્કમ્ભે પરિકીર્તિતમ્ ।
દણ્ડપાદં કરં ચૈવ વિક્ષિપ્યાક્ષિપ્ય ચૈવ હિ ॥ ૧૯૦॥

વ્યંસિતં વામહસ્તં ચ સહ પાદેન સર્પયેત્ ।
નિકુટ્ટકદ્વયં કાર્યમાક્ષિપ્તં મણ્ડલોરસિ ॥ ૧૯૧॥

કરિહસ્તં કટિચ્છિન્નં કર્તવ્યમપરાજિતે ।
કુટ્ટિતં કરણં કૃત્વા ભુજઙ્ગત્રાસિતં તથા ॥ ૧૯૨॥

રેચિતેન તુ હસ્તેન પતાકં હસ્તમાદિશેત્ ।
આક્ષિપ્તકં પ્રયુઞ્જીત હ્યુરોમણ્ડલકં તથા ॥ ૧૯૩॥

લતાખ્યં સકટકચ્છિન્નં વિષ્કમ્ભાપસૃતે ભવેત્ ।
ત્રિકં સુવલિતં કૃત્વા નૂપુરં કરણં તથા ॥ ૧૯૪॥

ભુજઙ્ગત્રાસિતં સવ્યં તથા વૈશાખરેચિતમ્ ।
આક્ષિપ્તકં તતઃ કૃત્વા પરિચ્છિન્નં તથૈવ ચ ॥ ૧૯૫॥

બાહ્યભ્રમરકં કુર્યાદુરોમણ્ડલમેવ ચ ।
નિતમ્બં કરિહસ્તં ચ કટિચ્છિન્નં તથૈવ ચ ॥ ૧૯૬॥

મત્તાક્રીડો ભવેદેષ હ્યઙ્ગહારો હરપ્રિયઃ ।
રેચિતં હસ્તપાદં ચ કૃત્વા વૃશ્ચિકમેવ ચ ॥ ૧૯૭॥

પુનસ્તેનૈવ યોગેન વૃશ્ચિકં સમ્પ્રયોજયેત્ ।
નિકુટ્ટકં તથા ચૈવ સવ્યાસવ્યકૃતં ક્રમાત્ ॥૧૯૮॥

લતાખ્યઃ સકટિચ્છેદો ભવેત્સ્વસ્તિકરેચિતે ।
પાર્શ્વે તુ સ્વસ્તિકં બદ્ધ્વા કાર્યં ત્વથ નિકુટ્ટકમ્ ॥ ૧૯૯॥

દ્વિતીયસ્ય ચ પાર્શ્વસ્ય વિધિઃ સ્યાદ્યમેવ હિ ।
તતશ્ચ કરમાવર્ત્ય હ્યૂરુપૃષ્ઠે નિપાતયેત્ ॥ ૨૦૦॥

ઊરૂદ્વૃત્તં તતઃ કુર્યાદાક્ષિપ્તં પુનરેવ હિ ।
નિતમ્બં કરિહસ્તં ચ કટિચ્છિન્નં તથૈવ ચ ॥ ૨૦૧॥

પાર્શ્વસ્વસ્તિક ઇત્યેષ હ્યઙ્ગહારઃ પ્રકીર્તિતઃ ।
વૃશ્ચિકં કરણં કૃત્વા લતાખ્યં હસ્તમેવ ચ ॥ ૨૦૨॥

તમેવ ચ કરં ભૂયો નાસાગ્રે સન્નિકુઞ્ચયેત્ ।
તમેવોદ્વેષ્ટિતં કૃત્વા નિતમ્બં પરિવર્તયેત્ ॥ ૨૦૩॥

કરિહસ્તં કટિચ્છિન્નં વૃશ્ચિકાપસૃતે ભવેત્ ।
કૃત્વા નૂપુરપાદં તુ તથાક્ષિપ્તકમેવ ચ ॥ ૨૦૪॥

પરિચ્છિન્નં ચ કર્તવ્યં સૂચીપાદં તથૈવ ચ ।
નિતમ્બં કરિહસ્તં ચાપ્યુરોમણ્ડલકં તથા ॥ ૨૦૫ ॥

કટીચ્છિન્નં તતશ્ચૈવ ભ્રમરઃ સ તુ સંજ્ઞિતઃ ।
મતલ્લિકરણં કૃત્વા કરમાવર્ત્ય દક્ષિણમ્ ॥ ૧૦૬॥

કપોલસ્ય પ્રદેશે તુ કાર્યં સમ્યઙ્નિકુઞ્ચિતમ્
અપવિદ્ધં દ્રુતં ચૈવ તલસંસ્ફોટસંયુતમ્ ॥ ૨૦૭॥

કરિહસ્તં કટિચ્છિન્નં મત્તસ્ખલિતકે ભવેત્ ।
દોલૈઃ કરૈઃ પ્રચલિતૈઃ સ્વસ્તિકાપસૃતૈઃ પદૈઃ ॥ ૨૦૮॥

અઞ્ચિતૈર્વલિતૈર્હસ્તૈસ્તલસઙ્ઘટ્ટિતૈસ્તથા ।
નિકુટ્ટિતં ચ કર્તવ્યમૂરૂદ્વૃતં તથૈવ ચ ॥ ૨૦૯॥

કરિહસ્તં કટિચ્છિન્નં મદાદ્વિલસિતે ભવેત્ ।
મણ્ડલં સ્થાનકં કૃત્વા તથા હસ્તૌ ચ રેચિતૌ ॥ ૨૧૦॥

ઉદ્ઘટ્ટિતેન પાદેન મત્તલ્લિકરણં ભવેત્ ।
આક્ષિપ્તં કરણં ચૈવ હ્યુરોમણ્ડલમેવ ચ ॥ ૨૧૧॥

કટિચ્છિન્નં તથા ચૈવ ભવેત્તુ ગતિમણ્ડલે ।
સમપાદં પ્રયુજ્યાથ પરિચ્છિન્નં ત્વનન્તરમ્ ॥ ૨૧૨॥

આવિદ્ધેન તુ પાદેન બાહ્યભ્રમરકં તથા ।
વામસૂચ્યા ત્વતિક્રાન્તં ભુજઙ્ગત્રાસિતં તથા ॥ ૨૧૩॥

કરિહસ્તં કટિચ્છિન્નં પરિચ્છિન્ને વિધીયતે ।
શિરસસ્તૂપરિ સ્થાપ્યૌ સ્વસ્તિઅકૌ વિચ્યુતૌ કરૌ । ૨૧૪॥

તતઃ સવ્યં કરં ચાપિ ગાત્રમાનમ્ય રેચયેત્ ।
પુનરુત્થાપયેત્તત્ર ગાત્રમુન્નમ્ય રેચિતમ્ ॥ ૨૧૫॥

લતાખ્યૌ ચ કરૌ કૃત્વા વૃશ્ચિકં સમ્પ્રયોજયેત્ ।
રેચિતં કરિહસ્તં ચ ભુજઙ્ગત્રાસિતં તથા ॥ ૨૧૬॥

આક્ષિપ્તકં પ્રયુઞ્જીત સ્વસ્તિકં પાદમેવ ચ ।
પરાઙ્મુખવિધિર્ભૂય એવમેવ ભવેદિહ ॥ ૨૧૭॥

કરિહસ્તં કટિચ્છિન્નં પરિવૃત્તકરેચિતી ।
રેચિતૌ સહ ગાત્રેણ હ્યપવિદ્ધૌ કરૌ યદા ॥ ૨૧૮॥

પુનસ્તેનૈવ દેશેન ગાત્રમુન્નમ્ય રેચયેત્ ।
કુર્યાન્નૂપુરપાદં ચ ભુજઙ્ગત્રાસિતં તથા ॥ ૨૧૯॥

રેચિતં મણ્ડલં ચૈવ બાહુશીર્ષે નિકુઞ્ચયેત્ ।
ઊરૂદ્વૃત્તં તથાક્ષિપ્તમુરોમણ્ડલમેવ ચ ॥ ૨૨૦॥

કરિહસ્તં કટિચ્છિન્નં કુર્યાદ્વૈશાખરેચિતે ।
આદ્યં તુ જનિતં કૃત્વા પાદમેકં પ્રસારયેત્ ॥૨૨૧॥

તથૈવાલાતકં કુર્યાત્ ત્રિકં તુ પરિવર્તયેત્ ।
અઞ્ચિતં વામહસ્તં ચ ગણ્ડદેશે નિકુટ્ટયેત્ ॥ ૨૨૨॥

કટિચ્છિન્નં તથા ચૈવ પરાવૃત્તે પ્રયોજયેત્ ।
સ્વસ્તિકં કરણં કૃત્વા વ્યંસિતૌ ચ કરૌ પુનઃ ॥ ૨૨૩॥

અલાતકં પ્રયુઞ્જીત હ્યૂર્ધ્વજાનુ નિકુઞ્ચિતમ્ ।
અર્ધસૂચી ચ વિક્ષિપ્તમુદ્વૃત્તાક્ષિપ્તકે તથા ॥ ૨૨૪॥

કરિહસ્તં કટિચ્છિન્નમઙ્ગહારે હ્યલાતકે ।
નિકુટ્ય વક્ષસિ કરાવૂર્ધ્વજાનુ પ્રયોજયેત્ ॥ ૨૨૫॥

આક્ષિપ્તસ્વસ્તિકં કૃત્વા ત્રિકં તુ પરિવર્તયેત્ ।
ઉરોમણ્ડલકૌ હસ્તૌ નિતમ્બં કરિહસ્તકમ્ ॥ ૨૨૬॥

કટિચ્છિન્નં તથા ચૈવ પાર્શ્વચ્છેદે વિધીયતે ।
સૂચીવામપદં દધ્યાદ્વિદ્યુદ્ભ્રાન્તં ચ દક્ષિણમ્ ॥ ૨૨૭॥

દક્ષિણેન પુનઃ સૂચી વિદ્યુદ્ભ્રાન્તં ચ વામતઃ ।

પરિચ્છિન્નં તથા ચૈવ હ્યતિક્રાન્તં ચ વામકમ્ ॥ ૨૨૮॥

લતાખ્યં સકટિચ્છિન્નં વિદ્યુદ્ભ્રાન્તશ્ચ સ સ્મૃતઃ ।
કૃત્વા નૂપુરપાદં તુ સવ્યવામૌ પ્રલમ્બિતૌ ॥ ૨૨૯॥

કરૌ પાર્શ્વે તતસ્તાભ્યાં વિક્ષિપ્તં સમ્પ્રયોજયેત્ ।
તાભ્યાં સૂચી તથા ચૈવ ત્રિકં તુ પરિવર્તયેત્ ॥ ૨૩૦॥

લતાખ્યં સકટિચ્છિન્નં કુર્તાદુદ્વૃત્તકે સદા ।
આલીઢવ્યંસિતૌ હસ્તૌ બાહુશીર્ષે નિકુટ્ટયેત્ ॥ ૨૩૧॥

નૂપુરશ્ચરણો વામસ્તથાલાતશ્ચ દક્ષિણઃ ।
તેનૈવાક્ષિપ્તકં કુર્યાદુરોમણ્ડલકૌ કરૌ ॥ ૨૩૨॥

કરિહસ્તં કટિચ્છિન્નમાલીઢે સમ્પ્રયોજયેત્ ।
હસ્તં તુ રેચિતં કૃત્વા પાર્શ્વમાનસ્ય રેચયેત્ ॥ ૨૩૩॥

પુનસ્તેનૈવ યોગેન ગાત્રમાનસ્ય રેચયેત્ ।
રેચિતં કરણં કાર્યમુરોમણ્ડલમેવ ચ ॥ ૨૩૪॥

કટિચ્છિન્નં તુ કર્તવ્યમઙ્ગહારે તુ રેચિતે ।
નૂપુરં ચરણં કૃત્વા ત્રિકં તુ પરિવર્તયેત્ ॥ ૨૩૫॥

વ્યંસિતેન તુ હસ્તેન ત્રિકમેવ વિવર્તયેત્ ।
વામં ચાલાતકં કૃત્વા સૂચીમત્રૈવ યોજયેત્ ॥ ૨૩૬॥

કરિહસ્તં કટિચ્છિન્નં કુર્યાદાચ્છુરિતે સદા ।
રેચિતૌ સ્વસ્તિકૌ પાદૌ રેચિતૌ સ્વસ્તિકૌ કરૌ ॥ ૨૩૭॥

કૃત્વા વિશ્લેષમેવં તુ તેનૈવ વિધિના પુનઃ ।
પુનરુત્ક્ષેપણં ચૈવ રેચિતૈરેવ કારયેત્ ॥ ૨૩૮॥

ઉદ્વૃત્તાક્ષિપ્તકે ચૈવ હ્યુરોમણ્ડલમેવ ચ ।
નિતમ્બં કરિહસ્તં ચ કટિચ્છિન્નં તથૈવ ચ ॥ ૨૩૯॥

આક્ષિપ્તરેચિતો હ્યેષ કરણાનાં વિધિઃ સ્મૃતઃ ।
વિક્ષિપ્ત કરણં કૃત્વા હસ્તપાદં મુખાગમમ્ ॥ ૨૪૦॥

વામસૂચિસહકૃતં વિક્ષિપેદ્વામકં કરમ્ ।
વક્ષઃસ્થાને ભવેત્સવ્યો વલિતં ત્રિકમેવ ચ ॥ ૨૪૧॥

નૂપુરાક્ષિપ્તકે ચૈવ હ્યર્ધસ્વસ્તિકમેવ ચ ।
નિતમ્બં કરિહસ્તં ચ હ્યુરોમણ્ડલકં તથા ॥ ૨૪૨॥

કટિચ્છિન્નં ચ કર્તવ્યં સમ્ભ્રાન્તે નૃત્તયોક્તૃભિઃ ।
અપક્રાન્તક્રમં કૃત્વા વ્યંસિતં હસ્તમેવ ચ ॥ ૨૪૩॥

કુર્યાદુદ્વેષ્ટિતં ચૈવ હ્યર્ધસૂચીં તથૈવ ચ ।
વિક્ષિપ્તં સકટિચ્છિન્નમુદ્વૃત્તાક્ષિપ્તકે તથા ॥ ૨૪૪॥

કરિહસ્તં કટિચ્છિન્નં કર્તવ્યમપસર્પિતે ।
કૃત્વા નૂપુરપાદં ચ દ્રુતમાક્ષિપ્ય ચ ક્રમમ્ ॥ ૨૪૫॥

પાદસ્ય ચાનુગૌ હસ્તૌ ત્રિકં ચ પરિવર્તયેત્ ।
નિકુટ્ય કરપાદં ચાપ્યુરોમણ્ડલકં પુનઃ ॥ ૨૪૬॥

કરિહસ્તં કટિચ્છિન્નં કાર્યમર્ધનિકુટ્ટકે ।
દ્વાત્રિંશદેતે સમ્પ્રોક્તા હ્યઙ્ગહારા દ્વિજોત્તમાઃ ॥ ૨૪૭॥

ચતુરો રેચકાંશ્ચાપિ ગદતો મે નિબોધત ।
પાદરેચક એકઃ સ્યાત્ દ્વિતીયઃ કટિરેચકઃ ॥ ૨૪૮॥

કરરેચકસ્તૃતીયસ્તુ ચતુર્થઃ કણ્ઠરેચકઃ ।
[રેચિતાખ્યઃ પૃથગ્ભાવે વલને ચાભિધીયતે ॥

ઉદ્વાહનાત્પૃથગ્ભાવાચ્ચલનાચ્ચાપિ રેચકઃ ।
પાર્શ્વાત્પાર્શ્વે તુ ગમનં સ્ખલિતૈશ્ચલિતૈઃ પદૈઃ ॥

વિવિધૈશ્ચૈવ પાદસ્ય પાદરેચક ઉચ્યતે ।
ત્રિકસ્યોદ્વર્તનં ચૈવ છટીવલનમેવ ચ ॥

તથાઽપસર્પણં ચૈવ કટિરેચક ઉચ્યતે ।
ઉદ્વર્તનં પરિક્ષેપો વિક્ષેપઃ પરિવર્તનમ્ ॥

વિસર્પણં ચ હસ્તસ્ય હસ્તરેચક ઉચ્યતે ।
ઉદ્વાહનં સન્નમનં તથા પાર્શ્વસ્ય સન્નતિઃ ॥

ભ્રમણં ચાપિ વિજ્ઞેયો ગ્રીવાયા રેચકો બુધૈઃ । ]
રેચકૈરઙ્ગહારૈશ્ચ નૃત્યન્તં વીક્ષ્ય શઙ્કરમ્ ॥ ૨૪૯॥

સુકુમારપ્રયોગેણ નૃત્યન્તીં ચૈવ પાર્વતીમ્ ।
મૃદઙ્ગભેરીપટહૈર્ભાણ્ડડિણ્ડિમગોમુખૈઃ ॥૨૫૦॥

પણવૈર્દર્દુરૈશ્ચૈવ સર્વાતોદ્યૈઃ પ્રવાદિતૈઃ ।
દક્ષયજ્ઞે વિનિહતે સન્ધ્યાકાલે મહેશ્વરઃ ॥ ૨૫૧॥

નાનાઙ્ગહારૈઃ પ્રાનૃત્યલ્લયતાલવશાનુગૈઅઃ ।
પિણ્ડિબન્ધાંસ્તતો દૃષ્ટ્વા નન્દિભદ્રમુખા ગણાઃ ॥ ૨૫૨॥

ચક્રુસ્તે નામ પિણ્ડીનાં બન્ધમાસાં સલક્ષણમ્ ।
ઈશ્વરસ્યેશ્વરી પિણ્ડી નન્દિનશ્ચાપિ પટ્ટસી ॥ ૨૫૩॥

ચણ્ડિકાયા ભવેત્પિણ્ડી તથા વૈ સિંહવાહિની ।
તાર્ક્ષ્યપિણ્ડી ભવેદ્વિષ્ણોઃ પદ્મપિણ્ડી સ્વયંભુવઃ ॥ ૨૫૪॥

શક્રસ્યૈરાવતી પિણ્ડી ઝષપિણ્ડી તુ માન્મથી ।
શિખિપિણ્ડી કુમારસ્ય રૂપપિણ્ડી ભવેચ્છ્રિયઃ ॥ ૨૫૫॥

ધારાપિણ્ડી ચ જાહ્નવ્યાઃ પાશપિણ્ડી યમસ્ય ચ ॥

વારુણી ચ નદીપિણ્ડી યાક્ષી સ્યાદ્ધનદસ્ય તુ ॥ ૨૫૬॥

હલપિણ્ડી બલસ્યાપિ સર્પપિણ્ડી તુ ભોગિનામ્ ।
ગાણેશ્વરી મહાપિણ્ડી દક્ષયજ્ઞવિમર્દિની ॥ ૨૫૭॥

ત્રિશૂલાકૃતિસંસ્થાના રૌદ્રી સ્યાદન્ધકદ્વિષઃ ।
એવમન્યાસ્વપિ તથા દેવતાસુ યથાક્રમમ્ ॥ ૨૫૮॥

ધ્વજભૂતાઃ પ્રયોક્તવ્યાઃ પિણ્ડીબન્ધાઃ સુચિહ્નિતાઃ ।
રેચકા અઙ્ગહારાશ્ચ પિણ્ડીબન્ધાતસ્થૈવ ચ ॥ ૨૫૯॥

સૃષ્ટ્વા ભગવતા દત્તાસ્તણ્ડવે મુનયે તદા ।
તેનાપિ હિ તતઃ સમ્યગ્ગાનભાણ્ડસમન્વિતઃ ॥ ૨૬૦॥

નૃત્તપ્રયોગઃ સૃષ્ટો યઃ સ તાણ્ડવ ઇતિ સ્મૃતઃ ।
ઋષય ઊચુઃ -
યદા પ્રાપ્ત્યર્થમર્થાનાં તજ્જ્ઞૈરભિનયઃ કૃતઃ ॥ ૨૬૧॥

કસ્માનૃત્તં કૃતં હ્યેતત્કં સ્વભાવમપેક્ષતે ।
ન ગીતકાર્થસમ્બદ્ધં ન ચાપ્યર્થસ્ય ભાવકમ્ ॥ ૨૬૨॥

કસ્માન્નૃત્તં કૃતં હ્યેતદ્ગીતેષ્વાસારિતેષુ ચ ।
ભરતઃ -

અત્રોચ્યતે ન ખલ્વર્થં કશ્ચિન્નૃત્તમપેક્ષતે ॥ ૨૬૩॥

કિં તુ શોભાં પ્રજનયેદિતિ નૃત્તં પ્રવર્તિતમ્ ।
પ્રાયેણ સર્વલોકસ્ય નૃત્તમિષ્ટં સ્વભાવતઃ ॥ ૨૬૪॥

મઙ્ગલમિતિ કૃત્વા ચ નૃત્તમેતત્પ્રકીર્તિતમ્ ।
વિવાહપ્રસવાવાહપ્રમોદાભ્યુઅદયાદિષુ ॥ ૨૬૫॥

વિનોદકારણં ચેતિ નૃત્તમેતત્પ્રવર્તિતમ્ ।
અતશ્ચૈવ પ્રતિક્ષેપાદ્ભૂતસઙ્ઘૈઃ પ્રવર્તિતાઃ॥ ૨૬૬॥

યે ગીતકાદૌ યુજ્યન્તે સમ્યઙ્નૃત્તવિભાગકાઃ।
દેવેન ચાપિ સમ્પ્રોક્તસ્તણ્ડુસ્તાણ્ડવપૂર્વકમ્ ॥ ૨૬૭॥

ગીતપ્રયોગમાશ્રિત્ય નૃત્તમેતત્પ્રવર્ત્યતામ્ ।
પ્રાયેણ તાણ્ડવવિધિર્દેવસ્તુત્યાશ્રયો ભવેત્ ॥૨૬૮॥

સુકુમારપ્રયોગશ્ચ શ઼ૃઙ્ગારરસસમ્ભવઃ ।
તસ્ય તણ્ડુપ્રયુક્તસ્ય તાણ્ડવસ્ય વિધિક્રિયામ્॥૨૬૯॥

વર્ધમાનકમાસાદ્ય સમ્પ્રવક્ષ્યમિ લક્ષણમ્ ।
કલાનાં વૃદ્ધિમાસાદ્ય હ્યક્ષરાણાં ચ વર્ધનાત્ ॥ ૨૭૦॥

લયસ્ય વર્ધનાચ્ચાપિ વર્ધમાનકમુચ્યતે ।
કૃત્વા કુતપવિન્યાસં યથાવદ્વિજસત્તમાઃ ॥ ૨૭૧॥

આસારિતપ્રયોગસ્તુ તતઃ કાર્યઃ પ્રયોક્તૃભિઃ ।
તત્ર તૂપોહનં કૃત્વા તન્ત્રીગાનસમન્વિતમ્ ॥ ૨૭૨॥

કાર્યઃ પ્રવેશો નર્તક્યા ભાણ્ડવાદ્યસમન્વિતઃ ।
વિશુદ્ધકરણાયાં તુ જાત્યાં વાદ્યં પ્રયોજયેત્ ॥૨૭૩॥

ગત્યા વાદ્યાનુસારિણ્યા તસ્યાશ્ચારીં પ્રયોજયેત્ ।
વૈશાખસ્થાનકેનેહ સર્વરેચકચારિણી ॥ ૨૭૪॥

પુષ્પાઞ્જલિધરા ભૂત્વા પ્રવિશેદ્રઙ્ગમણ્ડપમ્ ।
પુષ્પાઞ્જલિં વિસૃજ્યાથ રઙ્ગપીઠં પરીત્ય ચ ॥ ૨૭૫॥

પ્રણમ્ય દેવતાભ્યશ્ચ તતોઽભિનયમાચરેત્ ।
યત્રાભિનેયં ગીતં સ્યાત્તત્ર વાદ્યં ન યોજયેત્ ॥ ૨૭૬॥

અઙ્ગહારપ્રયોગે તુ ભાણ્ડવાદ્યં વિધીયતે ।
સમં રક્તં વિભક્તં ચ સ્ફુટં શુદ્ધપ્રહારજમ્ ॥ ૨૭૭॥

નૃત્તાઙ્ગગ્રાહિ વાદ્યજ્ઞૈર્વાદ્યં યોજ્યં તુ તાણ્ડવે ।
પ્રયુજ્ય ગીતવાદ્યે તુ નિષ્ક્રામેન્નર્તકી તતઃ ॥ ૨૭૮॥

અનેનૈવ વિધાનેન પ્રવિશન્ત્યપરાઃ પૃથક્ ।
અન્યાશ્ચાનુક્રમેણાથ પિણ્ડીં બધ્નન્તિ યાઃ સ્ત્રિયઃ ॥ ૨૭૯॥

તાવત્પર્યસ્તકઃ કાર્યો યાવત્પિણ્ડી ન બધ્યતે ।
પિણ્ડીં બદ્ધ્વા તતઃ સર્વા નિષ્ક્રામેયુઃ સ્ત્રિયસ્તુ તાઃ ॥ ૨૮૦॥

પિણ્ડીબન્ધેષુ વાદ્યં તુ કર્તવ્યમિહ વાદકૈઃ ।
પર્યસ્તકપ્રમાણેન ચિત્રૌઘકરણાન્વિતમ્ ॥ ૨૮૧॥

તત્રોપવાહનં ભૂયઃ કાર્યં પૂર્વવદેવ હિ ।
તતશ્ચાસારિતં ભૂયો ગાયનં તુ પ્રયોજયેત્ ॥ ૨૮૨॥

પૂર્વેણૈવ વિધાનેન પ્રવિશેચ્ચાપિ નર્તકી ।
ગીતકાર્થં ત્વભિનયેદ્ દ્વિતીયાસારિતસ્ય તુ ॥ ૨૮૩॥

તદેવ ચ પુનર્વસ્તુ નૃત્તેનાપિ પ્રદર્શયેત્ ।
આસારિતે સમાપ્તે તુ નિષ્ક્રામેન્નર્તકી તતઃ ॥ ૨૮૪॥

પૂર્વવત્પ્રવિશન્ત્યન્યાઃ પ્રયોગઃ સ્યાત્સ એવ હિ ।
એવં પદે પદે કાર્યો વિધિરાસારિતસ્ય તુ ॥ ૨૮૫॥

ભાણ્ડવાદ્યકૃતે ચૈવ તથા ગાનકૃતેઽપિ ચ ।
એકા તુ પ્રથમં યોજ્યા દ્વે દ્વિતીયં તથૈવ ચ ॥ ૨૮૬॥

તિસ્રો વસ્તુ તૃતીયં તુ ચતસ્રસ્તુ ચતુર્થકમ્ ।
પિણ્ડીનાં વિધયશ્ચૈવ ચત્વારઃ સમ્પ્રકીર્તિતાઃ ॥ ૨૮૭॥

પિણ્ડી શ‍ૃઙ્ખલિકા ચૈવ લતાબન્ધોઽથ ભેદ્યકઃ ।
પિણ્ડીબન્ધસ્તુ પિણ્ડત્વાદ્ગુલ્મઃ શ‍ૃઙ્ખલિકા ભવેત્ ॥ ૨૮૮॥

જાલોપનદ્ધા ચ લતા સનૃત્તો ભેદ્યકઃ સ્મૃતઃ ।
પિણ્ડીબન્ધઃ કનિષ્ઠે તુ શ‍ૃઙ્ખલા તુ લયાન્તરે ॥ ૨૮૯॥

મધ્યમે ચ લતાબન્ધો જ્યેષ્ઠે ચૈવાથ ભેદ્યકઃ ।
પિણ્ડીનાં વિવિધા યોનિર્યન્ત્રં ભદ્રાસનં તથા ॥ ૨૯૦॥

શિક્ષાયોગસ્તથા ચૈવ પ્રયોક્તવ્યઃ પ્રયોક્તૃભિઃ ।
એવં પ્રયોગઃ કર્તવ્યો વર્ધમાને તપોધનાઃ ॥ ૨૯૧॥

ગીતાનાં છન્દકાનાં ચ ભૂયો વક્ષ્યામ્યહં વિધિમ્ ।
યાનિ વસ્તુનિબદ્ધાનિ યાનિ ચાઙ્ગિકૃતાનિ તુ ॥ ૨૯૨॥

ગીતાનિ તેષાં વક્ષ્યામિ પ્રયોગં નૃત્તવાદ્યયોઃ ।
તત્રાવતરણં કાર્યં નર્તક્યાઃ સાર્વભાણ્ડિકમ્ ॥ ૨૯૩॥

ક્ષેપપ્રતિક્ષેપકૃતં ભાણ્ડોપોહનસંસ્કૃતમ્ ।
પ્રથમં ત્વભિનેયં સ્યદ્ગીતકે સર્વવસ્તુકમ્ ॥ ૨૯૪
તદેવ ચ પુનર્વસ્તુ નૃત્તીનાપિ પ્રદર્શયેત્ ।
યો વિધિઃ પૂર્વમુક્તસ્તુ નૃત્તાભિનયવાદિતે ॥ ૨૯૫॥

આસારિતવિધૌ સ સ્યાદ્ગીતાનાં વસ્તુકેષ્વપિ ।
એવં વસ્તુનિબન્ધાનાં ગીતકાનાં વિધિઃ સ્મૃતઃ ॥ ૨૯૬॥

શ઼ૃણુતાઙ્ગનિબદ્ધાનાં ગીતાનામપિ લક્ષણમ્ ।
ય એવ વસ્તુકવિધિર્નૃત્તાભિનયવાદિતે ॥ ૨૯૭॥

તમેવાઙ્ગનિબદ્ધેષુ ચ્છન્દકેષ્વપિ યોજયેત્ ।
વાદ્યં ગુર્વક્ષરકૃતં તથાલ્પાક્ષરમેવ ચ ॥ ૨૯૮॥

મુખે સોપોહને કુર્યાદ્વર્ણાનાં વિપ્રકર્ષતઃ ।
યદા ગીતિવશાદઙ્ગં ભૂયો ભૂયો નિવર્તતે ॥ ૨૯૯॥

તત્રાદ્યમભિનેયં સ્યાચ્છેષં નૃત્તેન યોજયેત્ ।
યદા ગીતિવશાદઙ્ગં ભૂયો ભૂયો નિવર્તતે ॥ ૩૦૦॥

ત્રિપાણિલયસંયુક્તં તત્ર વાદ્યં પ્રયોજયેત્ ।
યથા લયસ્તથા વાદ્યં કર્તવ્યમિહ વાદકૈઃ ॥ ૩૦૧॥

[ તતં ચાનુગતં ચાપિ ઓઘં ચ કરણાન્વિતમ્ ।
સ્થિરે તત્ત્વં (તં) પ્રયોક્તવ્યં મધ્યે ચાનુગતં ભવેત્ ॥

ભૂયશ્ચૌઘઃ પ્રયોક્તવ્યસ્ત્વેષ વાદ્યગતો વિધિઃ ।
છન્દોગીતકમાસાદ્ય ત્વઙ્ગાનિ પરિવર્તયેત્ ॥

એષ કાર્યો વિધિર્નિત્યં નૃત્તાભિનયવાદિતે ।

યાનિ વસ્તુનિબદ્ધાનિ તેષામન્તે ગ્રહો ભવેત્ ॥

અઙ્ગાનાં તુ પરાવૃત્તાવાદાવેવ ગ્રહો મતઃ ॥]
એવમેષ વિધિઃ કાર્યો ગીતેષ્વાસારિતેષ્વપિ ।
દેવસ્તુત્યાશ્રયં હ્યેતત્સુકુમારં નિબોધત ॥ ૩૦૨॥

સ્ત્રીપુંસયોસ્તુ સંલાપો યસ્તુ કામસમુદ્ભવઃ ।
તજ્જ્ઞેયં સુકુમારં હિ શૃઙ્ગારરસસમ્ભવમ્ ॥ ૩૦૩॥

યસ્યાં યસ્યામવસ્થાયાં નૃત્તં યોજ્યં પ્રયોક્તૃભિઃ ।
તત્સર્વં સમ્પ્રવક્ષ્યામિ તચ્ચ મે શૃણુત દ્વિજાઃ ॥ ૩૦૪॥

અઙ્ગવસ્તુનિવૃત્તૌ તુ તથા વર્ણનિવૃત્તિષુ ।
તથા ચાભ્યુદયસ્થાને નૃત્તં તજ્જ્ઞઃ પ્રયોજયેત્ ॥ ૩૦૫॥

યત્તુ સંદૃશ્યતે કિઞ્ચિદ્દમ્પત્યોર્મદનાશ્રયમ્ ।
નૃત્તં તત્ર પ્રયોક્તવ્યં પ્રહર્ષાર્થગુણોદ્ભવમ્ ॥ ૩૦૬॥

યત્ર સન્નિહિતે કાન્તે ઋતુકાલાદિદર્શનમ્ ।
ગીતકાર્થાભિસંબદ્ધં નૃત્તં તત્રાપિ ચેષ્યતે ॥ ૩૦૭॥

ખણ્ડિઅતા વિપ્રલબ્ધા વા કલહાન્તરિતાપિ વા ।
યસ્મિન્નઙ્ગે તુ યુવતિર્ન નૃત્તં તત્ર ન યોજયેત્ ॥૩૦૮॥

સખીપ્રવૃત્તે સંલાપે તથાઽસન્નિહિતે પ્રિયે ।
ન હિ નૃત્તં પ્રયોક્તવ્યં યસ્યા ન પ્રોષિતઃ પ્રિયઃ ॥ ૩૦૯॥

[ દૂત્યાશ્રયં યદા તુ સ્યાદૃતુકાલાદિ દર્શનમ્ ।
ઔત્સુક્યચિન્તાસંબદ્ધં ન નૃત્તં તત્ર યોજયેત્ ॥]
યસ્મિન્નઙ્ગે પ્રસાદં તુ ગૃહ્ણીયાન્નાયિકા ક્રમાત્ ।
તતઃપ્રભૃતિ નૃત્તં તુ શેષેષ્વઙ્ગેષુ યોજયેત્ ॥ ૩૧૦॥

દેવસ્તુત્યાશ્રયકૃતં યદઙ્ગં તુ ભવેદથ ।
માહેશ્વરૈરઙ્ગહારૈરુદ્ધતૈસ્તત્પ્રયોજયેત્ ॥૩૧૧॥

યત્તુ શૃઙ્ગારસંબદ્ધં ગાનં સ્ત્રીપુરુષાશ્રયમ્ ।
દેવીકૃતૈરઙ્ગહારૈર્લલિતૈસ્તત્પ્રયોજયેત્ ॥ ૩૧૨॥

ચતુષ્પદા નર્કુટકે ખઞ્જકે પરિગીતકે ।
વિધાનં સમ્પ્રવક્ષ્યામિ ભાણ્ડવાદ્યવિધિં પ્રતિ ॥ ૩૧૩॥

ખઞ્જનર્કુટસંયુક્તા ભસ્વેધા તુ ચતુષ્પદા ।
પાદાન્તે સન્નિપાતે તુ તસ્યા ભાણ્ડગ્રહો ભવેત્ ॥ ૩૧૪॥

યા ધ્રુવા છન્દસા યક્તા સમપાદા સમાક્ષરા ।
તસ્યાઃ પાદાવસાને તુ પ્રદેશિન્યા ગ્રહો ભવેત્ ॥૩૧૫॥

કૃત્વૈકં પરિવર્તં તુ ગાનસ્યાભિનયસ્ય ચ ।
પુનઃ પાદનિવૃત્તિં તુ ભાણ્ડવાદ્યેન યોજયેત્ ॥૩૧૬॥

અઙ્ગવસ્તુનિવૃત્તૌ તુ વર્ણાન્તરનિવૃત્તિષુ ।
તથોપસ્થાપને ચૈવ ભાણ્ડવાદ્યં પ્રયોજયેત્ ॥ ૩૧૭॥

યેઽપિ ચાન્તરમાર્ગાસ્સ્યુઃ તન્ત્રિવાક્કરણૈઃ કૃતાઃ ।
તેષુ સૂચી પ્રયોક્તવ્યા ભાણ્ડેન સહ તાણ્ડવે ॥ ૩૧૮
મહેશ્વરસ્ય ચરિતં ય ઇદં સમ્પ્રયોજયેત્
સર્વપાપવિશુદ્ધાત્મા શિવલોકં સ ગચ્છતિ ॥ ૩૧૯॥

એવમેષ વિધિઃ સૃ(દૃ)ષ્ટસ્તાણ્ડવસ્ય પ્રયોગતઃ ।
ભૂયઃ કિં કથ્યતામન્યન્નાટ્યવેદવિધિં પ્રતિ ॥ ૩૨૦॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે તાણ્ડવલક્ષણં નામ ચતુર્થોઽધ્યાયઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 4*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*